# Shri Hari Prarthana Stotram

# श्रीहरिप्रार्थनास्तोत्रम्

## Document Information

Text title : Shri Hari Prarthana Stotram

File name : hariprArthanAstotram.itx

Category : vishhnu, svAminArAyaNa, krishna, stotra

Location : doc_vishhnu

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

Shri Hari Prarthana Stotram

# श्रीहरिप्रार्थनास्तोत्रम्

(ललित छन्द)
अति-मनोहरं सर्व-सुन्दरं
तिलकलक्षणं चञ्चलेक्षणम् ।
विबुधवन्दितं स्वामिनाथ ते
वपुरिहासतु नो नित्यदर्शने ॥ १॥

मदन-मोहनं प्रेम-दोहनं
नयनगोचरं भक्तसञ्चरम् ।
भुवि सुदुर्लभं स्वामिनाथ ते
वपुरिहास्तु नो नित्यदर्शने ॥ २॥

निजजनैः सदा वाञ्छितं हृदा
परसुखावहं हृत्तमोपहम् ।
परम-मङ्गलं स्वामिनाथ ते
वपुरिहास्तु नो नित्यदर्शने ॥ ३॥

हृदय-रोचनं बद्ध-मोचनं
विगतशोचनं दीर्घलोचनम् ।
मृदु-सिताम्बरं स्वामिनाथ ते
वपुरिहास्तु नो नित्यदर्शने ॥ ४॥

मधुर-भाषणं पुष्प-भूषणं
विजितदूषणं शोकशोषणम् ।
प्रहसदाननं स्वामिनाथ ते
वपुरिहास्तु नो नित्यदर्शने ॥ ५॥

कुसुम-शेखरं कोमलान्तरं
सदय-दर्शनं दुःखकर्शनम् ।
विधिहरार्चितं स्वामिनाथ ते

वपुरिहास्तु नो नित्यदर्शने ॥ ६॥

परम-पावनं लोक-भावनं
कुटिल-कुन्तलं पुष्पकुण्डलम् ।
भवभयापहं स्वामिनाथ ते
वपुरिहास्तु नो नित्यदर्शने ॥ ७॥

सकलसिद्धिभिः सर्वऋद्धिभिः
श्रितपदं सदा योगिभिर्मुदा ।
तदिदमेव हि स्वामिनाथ ते
वपुरिहास्तु नो नित्यदर्शने ॥ ८॥

तव निवासतो दुर्गपत्तनं
जयति भूतले सर्वतोऽधिकम् ।
भवदुपाश्रयात् मुक्तिरत्र यद्
वसति सर्वदान्यत्रदुर्लभा ॥ ९॥

कुपथ-दुर्वनाद् घोरयौवनाद्
रसनवृश्चिकात् लोभलुब्धकात् ।
बहुतरापदो भूरि सम्पदो
मुहुरिह त्वया रक्षिता वयम् ॥ १०॥

प्रबल-संशयाद् दुष्टसंश्रयान्
मदबिलेशयात् कुत्सिताशयात् ।
स्मरसरीसृपान् मानकोणपान्
मुनिपते वयं रक्षिता स्त्वया ॥ ११॥

अशुभ-भावतः क्रोधदावतो
मृतिजनुर्भयात् पापदुर्नयात् ।
मधुमहाविषात् सर्वथामिषाद्
यतिपते वयं रक्षितास्त्वया ॥ १२॥

विषयवारिधे स्तारिता यथा
करुणया वयं भूरिशस्तथा ।
तवपदाम्बुजा-सक्तिविघ्नतः
सततमेव नः पातुमर्हसि ॥ १३॥

कवचन मानसं त्वत्पदाम्बुजाद्
व्रजतु मान्यतो नाथ नः सदा ।
इति वयं मुहुः प्रार्थयामहे
निजजनप्रियं त्वामधीश्वरम् ॥ १४॥

इति श्रीशतानन्दमुनिमुनिविरचितं श्रीहरिप्रार्थनास्तोत्रं सम्पूर्णम् ।

---

*Shri Hari Prarthana Stotram*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*